# योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ७२



द्विसप्ततितमः सर्गः ७२

श्रीवसिष्ठ उवाच ।

देहे जाते न जातोऽसि देहे नष्टे न नश्यसि ।

त्वमात्मन्यकलङ्कात्मा देहस्तव न कश्चन ।। १

यः कुण्डबदरन्यायो या घटाकाशसंस्थितिः ।

तत्रैकस्मिन्क्षते क्षीणे द्वे इति व्यर्थकल्पना ।। २

विनाशिनि विनष्टेऽस्मिन्देहे स्वां स्थितिमागते ।

विनश्यामीति यः खेदी तं धिगस्त्वन्धचेतसम् ।। ३

यादृशो रश्मिरथयोः स्नेहोद्वेगविवर्जितः ।

संबन्धस्तादृशो देहचित्तेन्द्रियमुखैश्चितेः ।। ४

गतेतरेतरापेक्षः सरःपङ्कामलाम्भसाम् ।

यथा राघव संबन्धस्तथा देहेन्द्रियात्मनाम् ।। ५

यादृशोऽध्वा गताध्वानां निरास्थापरिदेवनः ।

संयोगो विप्रयोगश्च तादृशो देहदेहिनोः ।। ६

यथा कल्पितवेतालविकारभयभीतयः ।

मिथ्यैव कल्पिता एते तथा स्नेहसुखादयः ।। ७

भूतपञ्चकसंपिण्डाद्रचिता जनताः पृथक् ।

एकस्मादेव विटपाद्विचित्रा इव पुत्रिकाः ।। ८

काष्ठेतरत्काष्ठभारे किंचिदन्यन्न दृश्यते ।

भूतपिण्डेतरद्देहे किंचिदन्यन्न दृश्यते ।। ९

भूतपञ्चकविक्षोभनाशोत्पादेषु हे जनाः ।

हर्षामर्षविषादानां किं भवन्तो वशं गताः ।। १०

को नामातिशयः पुंसां स्त्रीनाम्न्यपरनाम्नि च ।
पेलवे भूतसंघाते प्रोद्भूतजनपातवत् ।। ११
संनिवेशांशवैचित्र्यमज्ञानामेव तुष्टये ।
तज्ज्ञानां तु यथाभूतभूतपञ्चकदर्शनम् ।। १२
मिथः शिलापुत्रकयोर्यथैकोपलपुत्रयोः ।
श्लिष्टयोरपि नो रागस्तथा चित्तशरीरयोः ।। १३
मृत्पुंसां यादृशोऽन्योन्यमाशयः संगमे भवेत् ।
बुद्धीन्द्रियात्ममनसां संगमे तादृशोऽस्तु ते ।। १४
नान्योन्यस्नेहसंबन्धभाजनं शैलपुत्रकाः ।
देहेन्द्रियात्मप्राणाश्च कस्यात्र परिदेवना ।। १५
इतश्चेतश्च जातानि यथा संश्लेषयन्त्यलम् ।
तरङ्गास्तृणजालानि तथा भूतानि देहदृक् ।। १६
संयुज्यन्ते वियुज्यन्ते तृणान्यब्धिजले यथा ।
मुक्तान्तःकलनं देहे भूतान्यात्मनि वै तथा ।। १७
आत्मा चित्ततया देहभूतान्याश्लेषयन्स्थितः ।
तृणान्यावृत्तवृत्तान्तकलनोत्सिक्तमब्धिवत् ।। १८
प्रबोधाच्चेत्यतां त्यक्त्वा व्रजत्यात्मात्मतां स्वयम् ।
स्वस्पन्दवशतो वारि त्यक्त्वाच्छत्वमिवाच्छतां ।।१९
ततो विश्लिष्टभूतौघो देहं संप्रति पश्यति ।
वायुस्कन्धगतो जन्तुर्वसुधामण्डलं यथा ।। २०
पृथग्भूतगणं दृष्ट्वा देहातीतो भवत्यजः ।
परं प्रकाशमायाति सूर्यकान्तिरिवाहनि ।। २१
जानात्यथात्मनात्मानं मानमेयामयोज्झितम् ।
मुक्तक्षीबतयेवान्तः स्वां संविदमनुस्मरन् ।। २२
आत्मैव स्पन्दते विश्वं वस्तुजातैरिवोदितम् ।
तरङ्गकणकल्लोलैरनन्ताम्ब्वम्बुधाविव ।। २३

एवंप्रायमहाबोधा वीतरागा गतैनसः ।

जीवन्मुक्ताश्चरन्तीह महासत्त्वपदं गताः ।। २४

यथा चरन्ति विविधैर्मणिरत्नैर्महोर्मयः ।

निरस्तवासनाश्चित्तव्यवहारैस्तथोत्तमाः ।। २५

न कूलकाष्ठैर्जलधिर्न रजोभिर्नभस्तलम् ।

न म्लायति निजैर्लोकव्यवहारैरिहात्मवान् ।। २६

गतैरभ्यागतैः स्वच्छैश्चपलैर्मलिनैर्जडैः ।

न रागो नाम्बुधेर्द्वेषो भोगैश्चाधिगतात्मनः ।। २७

यन्मनोमननं किंचित्समग्रं जगति स्थितम् ।

तच्चेत्योन्मुखचित्तत्त्वविलासोल्लसनं विदुः ।। २८

यदहं यच्च भूतादि कालत्रितयभावि यत् ।

दृश्यदर्शनसंबन्धविस्तारैस्तद्विजृम्भते ।। २९

यदृश्यं तदसत्सद्वा दृष्टिमेकामुपाश्रितम् ।

अन्यत्त्वलेपकं तस्माद्धर्षशोकदृशौ कुतः ।। ३०

असत्यमेवासत्यं हि सत्यं सत्यं सदेव हि ।

सत्यासत्यमसद्विद्धि तदर्थं किं नु मुह्यसि ।। ३१

असम्यग्दर्शनं त्यक्त्वा सम्यक्पश्य सुलोचन ।

न क्वचिन्मुह्यति प्रौढः सम्यग्दर्शनवानिह ।। ३२

दृश्यदर्शनसंबन्धविस्तारैस्तद्विजृम्भते ।

दृश्यदर्शनसंबन्धे यत्सुखं पारमात्मिकम् ।। ३३

अनुभूतिमयं तस्मात्सारं ब्रह्मेति कथ्यते ।

दृश्यदर्शनसंबन्धे सुखसंविदनुत्तमा ।। ३४

ददात्यज्ञाय संसारं ज्ञाय मोक्षं सदोदयम् ।

दृश्यदर्शनसंबन्धसुखमात्मवपुर्विदुः ।। ३५

तदृश्यवलितं बन्धस्तन्मुक्तं मुक्तिरुच्यते ।

दृश्यदर्शनसंबन्धसुखसंविदनामया ।। ३६

क्षयातिशयमुक्ता चेत्तन्मुक्तिः सोच्यते बुधैः ।

दृश्यदर्शनसंबन्धे यानुभूतिः स्वगोचरा ।। ३७

दृश्यदर्शननिर्मुक्ता तामालम्ब्य भवाभवः ।

सौषुप्ती दृष्टिरेषा हि यात्येवं संप्रकाशते ।। ३८

एवं च याति तुर्यत्वमेवं मुक्तिरिति स्मृता ।

दृश्यदर्शनमुक्तायां युक्तायां परया धिया ।। ३९

दृश्यदर्शनसंबन्धसंविदस्यां तु राघव ।

नात्मा स्थूलो न चैवाणुर्न प्रत्यक्षो न चेतरः ।। ४०

न चेतनो न च जडो न चैवासन्न सन्मयः ।

नाहं नान्यो न चैवैको नानेको नाप्यनेकवान् ।। ४१

नाभ्याशस्थो न दूरस्थो नैवास्ति न च नास्ति च ।

न प्राप्यो नाति चाप्राप्यो न वा सर्वो न सर्वगः ।। ४२

न पदार्थो नापदार्थो न पञ्चात्मा न पञ्च च ।

यदिदं दृश्यतां प्राप्तं मनःषष्ठेन्द्रियास्पदम् ।। ४३

तदतीतं पदं यत्स्यात्तन्न किंचिदिवेह तत् ।

यथाभूतमिदं सम्यग्ज्ञस्य संपश्यतो जगत् ।। ४४

सर्वमात्ममयं विश्वं नास्त्यनात्ममयं क्वचित् ।

काठिन्यद्रवणस्पन्दखावकाशावलोकनैः ।। ४५

आत्मैव सर्वं सर्वेषु भूवार्यनिलखाग्निषु ।

सत्तैवास्ति न वस्तूनां या या राम चिता विना ।

व्यतिरिक्तं ततोऽस्मीति विद्धिप्रोन्मत्तजल्पितम् ।। ४६

एको जगन्ति सकलानि समस्तकाल-

कल्पक्रमान्तरगतानि गतागतानि ।

आत्मैव नेतरकलाकलनास्ति काचि-

दित्थंमतिर्भव तयातिगतो महात्मन् ।। ४७

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये देवदूतोक्ते मोक्षोपायेषूपशमप्रकरणे मोक्षस्वरूपोपदेशो नाम

द्विसप्ततितमः सर्गः ।। ७२ ।।